॥ ॐ नमो भगवते वासुदेवाय ॥

# श्रीमद् भागवत रसिक कुटुंब

## सूर्य अष्टकम्

श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# सूर्य अष्टकम्

आदिदेव नमस्तुभ्यं(म्) प्रसीद मम भास्कर ।
दिवाकर नमस्तुभ्यं(म्) प्रभाकर नमोऽस्तु ते॥1॥

सप्ताश्व रथमारूढं(म्) प्रचण्डं(ङ्) कश्यपात्मजम् ।
श्वेत पद्माधरं(न्) देवं(न्) तं(म्) सूर्यं(म्) प्रणमाम्यहम् ॥2॥

लोहितं(म्) रथमारूढं(म्) सर्वलोक पितामहम् ।
महापापहरं(न्) देवं(न्) तं(म्) सूर्यं(म्) प्रणमाम्यहम् ॥3॥

त्रैगुण्यश्च महाशूरं(म्) ब्रह्माविष्णु महेश्वरम् ।
महापापहरं(न्) देवं(न्) तं(म्) सूर्यं(म्) प्रणमाम्यहम् ॥4॥

बृहितं(न्) तेजः(फ्) पुञ्ज च वायु आकाशमेव च ।
प्रभुत्वं(म्) सर्वलोकानां(न्) तं(म्) सूर्यं(म्) प्रणमाम्यहम् ॥5॥

बन्धूकपुष्पसङ्काशं(म्) हारकुण्डलभूषितम् ।
एकचक्रधरं(न्) देवं(न्) तं(म्) सूर्यं(म्) प्रणमाम्यहम् ॥6॥

तं(म्) सूर्यं(ल्) लोककर्तारं(म्) महा तेजः(फ्) प्रदीपनम् ।
महापाप हरं(न्) देवं(न्) तं(म्) सूर्यं(म्) प्रणमाम्यहम् ॥7॥

तं(म्) सूर्यं(ञ्) जगतां(न्) नाथं(ञ्) ज्ञानप्रकाशमोक्षदम् ।
महापापहरं(न्) देवं(न्) तं(म्) सूर्यं(म्) प्रणमाम्यहम् ॥8॥

सूर्याष्टकं(म्) पठेन्नित्यं(ङ्) ग्रहपीडा प्रणाशनम् ।
अपुत्रो लभते पुत्रं(न्) दारिद्रो धनवान् भवेत् ॥9॥

अमिषं(म्) मधुपानं(ञ्) च यः(ख्) करोति रवेर्दिने ।
सप्तजन्मभवेत् रोगि जन्मजन्म दरिद्रता ॥10॥

स्त्री-तैल-मधु-मांसानि ये त्यजन्ति रवेर्दिने ।
न व्याधि शोक दारिद्यं(म्) सूर्य लोकं(ञ्) च गच्छति ॥11॥